दिनाङ्क:- 01.09.2025

प्रात: - 06:55

## प्रधानमन्त्री-एससीओ शिखरसम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य चीनदेशस्य थियाचीन-नगरे शाङ्घाई-सहकार-सङ्घटन- शिखरसम्मेलनस्य पूर्ण सत्रं सम्बोधयिष्यति। प्रधानमन्त्री नरेन्द्रमोदी अद्य चीनदेशस्य थियाचीन-नगरे शाङ्घाई-सहकार-सङ्घटन- शिखरसम्मेलनस्य पूर्ण सत्रं सम्बोधयिष्यति। विदेशसचिवः विक्रम मिसरी थियाचिन-नगरे वार्ताहरान् अवदत् यत् स्वस्य भाषणे श्रीमोदी एस्. सी. ओ. इत्यस्य अन्तर्गतं क्षेत्रीयसहयोगं संवर्धनाय भारतस्य दृष्टिकोणं स्थापयिष्ति इति। शिखरसम्मेलनस्य पूर्णसत्रं सम्बोधनानन्तरं प्रधानमन्त्री मोदी रूसदेशस्य राष्ट्रपतिना व्लादिमिर् पुटिनेन सह द्वैपाक्षिकोपवेशनं करिष्यति। पूर्वं ह्यः, प्रधानमन्त्री मोदी तथा चीनदेशस्य राष्ट्रपतिः षि चिनफिङ्गः च भारत-चीनदेशयोः मध्ये द्वैपाक्षिकसम्बन्धानां पुनर्निर्माणे केन्द्रीकृतं विस्तृतं वार्तालापं कृतवन्तौ। श्री मिसरी वर्यः अवदत् यत्, सभायां श्रीमोदी द्वैपाक्षिकसम्बन्धानां निरन्तरं विकासाय सीमाक्षेत्रेषु शान्तेः सौहार्दस्य च महत्त्वं अधोरेखितवान्।

## राष्ट्रपति-कर्नाटकः

राष्ट्रपतिः द्रौपदी मुर्मु: अद्यारभ्य कर्णाटकस्य तमिळुनाडुराज्यस्य च त्रिदिवसीय यात्रायां भविष्यति। अद्य राष्ट्रपतिः मैसूरु-नगरे अखिल-भारतीय-वाणी-श्रवण-संस्थानस्य हीरकमहोत्सवे भागं ग्रहीष्यति। श्वः सा चेन्नै-नगरे सिटी-यूनियन्-बैंक इत्यस्य विंशत्यधिकैकशत तमे संस्थापनादिवस-समारोहे भागं भजिष्यति। राष्ट्रपतिः तिरुवरूर्-नगरे स्थितस्य तमिलनाडुराज्यस्य केन्द्रीयविश्वविद्यालयस्य दशमे दीक्षान्तसमारोहेपि भागं स्वीकरिष्यति।

## अमित शाह-जम्मू भ्रमण

केन्द्रीयः गृहमन्त्री अमितशाहः अद्य जम्मू-नगरं गत्वा प्रवर्तमानस्य उद्धारकार्याणां समीक्षां करिष्यति तथा च सद्यः एव मेघस्फोटेन जलप्लावनेन च जातस्य क्षतेः आकलनं करिष्यति। सः कटरा-नगरस्य स्थितेः समीक्षां करिष्यति, यत्र श्रीमाता वैष्णोदेवी-तीर्थमार्गे भूस्खलनेन नैके जनाः मृताः सन्ति। जम्मू-नगरं सम्प्राप्य, श्री शाहः राजभवनं गत्वा उच्च-स्तरीय-समीक्षा-सभायाः अध्यक्षतां कृत्वा जलप्लावन-निवारण-उपायानां विषये चर्चां, मूल्याङ्कनं च विधाष्यति।

गृहमन्त्रालयेन प्रचण्डवृष्ट्या, जलाप्लवनेन, आकस्मिकजलप्रलयेन, मेघस्फोटेन, भूस्खलनेन च जातेः क्षतेः मूल्याङ्कनं कर्तुं हिमाचलप्रदेश, उत्तराखण्ड, पञ्जाब, जम्मू-कश्मीरराज्याणां कृते अन्तर्मन्त्रालयीय- केन्द्रियदलानि निर्मितानि। एकस्मिन् वक्तव्ये, मन्त्रालयेन उक्तं यत्, गृहमन्त्रिणः अमितशाहस्य निर्देशानुसारं, एतानि दलानि स्थित्याः मूल्याङ्कनं करिष्यन्ति तथा च सम्बद्ध-राज्य- प्रशासनैः कृतानां साहाय्योद्धार-कार्याणां समीक्षापि करिष्यन्ति।

<u>ऋतु विभाग:</u>

भारत-ऋतु विभागेन अद्य हिमाचलप्रदेशे उत्तराखण्डे च अतिवृष्टेः रक्तवर्णीया सञ्चेतना प्रसारिता अस्ति। ऋतु-विभागेन पूर्वीय राजस्थान, हरियाणा, चण्डीगढ, दिल्ली, जम्मू-कश्मीर, लद्दाख, गिल्गित-बाल्टिस्तान, मुजफ्फराबाद, ओडिशा, पञ्जाब, उत्तरप्रदेशेषु अपि आगामिदिनद्वयं यावत् अत्यधिकवृष्टिः भविष्यति इति पूर्वानुमानं कृतम् अस्ति। छत्तीसगढ, आन्ध्रप्रदेश, कर्नाटक, गुजरात, महाराष्ट्र, केरल, माहे, कोङ्कण, गोवा इत्येतेषु राज्येषु अस्य मासस्य तृतीयदिनांक पर्यन्तं प्रचण्डवृष्टिः भवितुं शक्नोति।

<u>एशिया कप हॉकी राजगीर</u>

बिहारस्य राजगीर्-नगरे एशियाकप-पुरुष-हॉकी-प्रतियोगितायां भारतेन गतसायं जापान-दलं त्रीणि-द्वे इति अङ्कान्तरालेन पराजितम्।